"तथाष्टपूर्णकलसान् पादुकासनभाजनान् ।
दीपिकोपानहच्छत्रचामरासनसंयुतम्" ॥

पादुकासनभाजनान् पादुकासनभाजनसहितानित्यर्थः । आसनपदञ्चात्र कलसावस्थानोचितासनपरम् । चामरासनसंयुतमिति पुनरासनपदश्रवणात् ।

"फलपङ्क्तियुतं तद्वदुपरिष्टाद्वितानकम् ।
तथाष्टादशधान्यानि समन्तात् परिकल्पयेत् ॥
होमाधिवासनान्ते तु स्नापितो वेदपुङ्गवैः ।
त्रिःप्रदक्षिणमावृत्य मन्त्रमेतमुदीरयेत् ॥
नमस्ते कल्पवृक्षाय चिन्तितान्नप्रदाय च ।
विश्वम्भराय देवाय नमस्ते विश्वमूर्त्तये ॥
यस्मात्त्वमेव विश्वात्मा ब्रह्मा स्थाणुर्दिवाकरः ।
मूर्त्तामूर्त्तपरं वीजमतः पाहि सनातन ! ॥
त्वमेवामृतसर्व्वस्वमनन्तपुरुषोऽव्ययः ।
सन्तानाद्यैरुपेतः सन् पाहि संसारसागरात् ॥
एवमामन्त्र्य तं दद्यादगुरवे कल्पपादपम् ।
चतुर्भ्यश्चापि ऋत्विग्भ्यः सन्तानादीनि कल्पयेत्" ॥

एतेन चत्वार एवर्त्विजः कर्त्तव्याः । कुण्डमयाश्चत्वारो ब्राह्मणा इत्युक्तं सम्भवति ॥

"स्वल्पेष्वेकाग्निवत् कुर्य्यात् गुरुरेवाभिपूजितः ।
न वित्तशाठ्यं कुर्व्वीत न च विस्मयवान् भवेत्" ।

न च विस्मयवान् इदम्मया दत्तमिति नाहङ्कारवान् भवेदित्यर्थः ॥

"अनेन विधिना यस्तु महादानं निवेदयेत् ।
सर्व्वपापविनिर्मुक्तः सोऽश्वमेधफलं लभेत् ॥
अप्सरोभिः परिवृतः सिद्धचारणकिन्नरैः ।
भूतान्भव्यांश्च मनुजांस्तारयेदात्मसम्मितान् ॥
स्तूयमानो दिवः पृष्ठे पुत्त्रपौत्त्रप्रपौत्त्रवान् ।
विमानेनार्कवर्णेन विष्णुलोकं स गच्छति ।
दिवि कल्पशतं तिष्ठेद्राजराजो भवेत्ततः ॥
नारायणबलोपेतो नारायणपरायणः ।
नारायणकथासक्तो नारायणपुरं व्रजेत् ॥
यो वा पठेत् कनककल्पतरुप्रदानं
यो वा शृणोति पुरुषोऽल्पधनः स्मरेद्वा ।
सोऽपीन्द्रलोकमधिगम्य सहाप्सरोभि-
र्म्मन्वन्तरं वसति पापविमुक्तदेहः" ॥ * ॥

अत्र यजमानः समुपजातकल्पपादपमहादानदानेच्छुस्तुलापुरुषलिखितं खड्गचर्म्ममयाच्छन्नसन्नाहतुलास्थाप्यहरिप्रतिमालङ्कारतुलाहस्तग्राह्यप्रतिमार्त्विक्चतुष्टयवरणादिदक्षिणासामग्रीवर्हिः सर्व्वसम्भारं अधिकत्वेन पलत्रयादुर्द्ध्वसहस्रपलावधियथेष्टकाञ्चनमुपादाय तस्यार्द्धेन कल्पपादपमपरार्द्धेन समभागेन सन्तानं मन्दारं पारिभद्रं हरिचन्दनमेवं पञ्चतरून् पञ्चशाखान् सौवर्णनानाफलपक्षिसुवर्णनिर्म्मितानेकवसनाकारसहितान् केयूरकुण्डलाद्यभिमतालङ्कारभूषितान् एषामाच्छादनार्थं श्वेतवस्त्रयुगपञ्चकं तरूणामवस्थापनार्थं गुड़प्रस्थद्वयं प्रत्येकं प्रस्थपरिमितान् पात्रस्थघृतजीरकतिलांश्च कल्पवृक्षाधःस्थापनार्थमभीष्टसुवर्णान्तरयन्त्रोत्खाटिता ब्रह्मविष्णुशिवभास्करप्रतिमाः यथोक्तक्रमतश्चतुष्टयाधःस्थापनार्थमभिमतसुवर्णान्तरयन्त्रोत्खाटिताः सरतिकामदेवलक्ष्मीसावित्रीसुरभिप्रतिमाश्च कल्पतरुपार्श्वस्थापनार्थमष्टौ कुम्भान् तदधःस्थापनार्थं कुशादिनिर्म्मितासनाष्टकं कुम्भाच्छादनार्थं कौषेयवस्त्राष्टकं कुम्भपार्श्वस्थापनार्थमिक्षुदण्डाष्टकं पुष्पमालाष्टकसामग्रीं यथेष्टफलाष्टकं पादुकायुगाष्टकं कांस्यभाजनाष्टकञ्च कल्पतरुपार्श्वार्पणार्थं दीपिकोपानद्युगच्छत्रचामरासनाष्टादशधान्यानि च उत्पादयेत् । ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्व्वतरदिने यजमानगुर्व्वृत्विग्जापकास्तुलापुरुषवद्धविष्यभोजनादिकं कृत्वा निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने कल्पपादपपदं प्रक्षिप्य यथायथं निवेदनं सङ्कल्पञ्च कुर्य्युः । ततोऽपरदिने यजमानस्तुलापुरुषवद्गोविन्दाद्याराधनादिमधुपर्कदानान्तं गोविन्दाद्यभ्यर्चनब्राह्मणानुज्ञापनदानसङ्कल्पपुण्याहादिवाचनवरणवाक्येषु तुलापुरुषपदस्थाने कल्पपादपपदं प्रक्षिप्य कुर्य्यात् । ततो गुर्व्वृत्विग्यजमानजापका उपवसेयुः । अपरदिने च कृतनित्यास्तुलापुरुषवदग्निस्थापनादिमध्यब्राह्मणवाचनान्तं कर्म्म यथायथं कुर्य्युः । एवञ्च मध्यब्राह्मणवाचनान्तं कर्म्म तुलापुरुषग्रन्थं अनुसन्धायानुष्ठातव्यम् । तत ऋत्विजः कल्पतरुमानीय प्रधानवेद्यां लिखितचक्रमध्ये गुड़प्रस्थं दत्त्वा तदुपरि स्थापयेयुः । ततस्तस्याधो गुड़प्रस्थोपरि पङ्क्तिक्रमेण सुवर्णयन्त्रोत्खाटिता ब्रह्मविष्णुशिवभास्करप्रतिमाः स्थापयेयुः । तत्पूर्व्वतः अधस्तादारोपितसरतिकामदेवप्रतिमां गुड़प्रस्थोपरि सन्तानं कल्पतरुदक्षिणतः अधःसमारोपितलक्ष्मीप्रतिमां घृतप्रस्थोपरि मन्दारं कल्पतरोः पश्चिमतः अधःसमारोपितसावित्रीप्रतिमां जीरकप्रस्थोपरि पारिभद्रं कल्पतरूत्तरतः अधःसमारोपितसुरभिप्रतिमां तिलप्रस्थोपरि हरिचन्दनञ्चारोपयेयुः । सर्व्वांश्च वृक्षान् प्रत्येकं सितवस्त्रयुगेनाच्छादयेयुः । अष्टासु दिक्षु प्रत्येकं कौषेयवस्त्राच्छादितान् इक्षुदण्डफलान्वितान् माल्यालङ्कृतानष्टौ पूर्णकुम्भान् पार्श्वारोपितपादुकायुगभाजनानासनेष्वारोप्य कल्पतरुपार्श्वे पूर्व्वोक्तदीपिकाद्युपकरणमारोपयेयुः । ततो मङ्गलतूर्य्यगीतवन्दिघोषेषु सत्सु ऋत्विजः कुण्डसमीपस्थकुम्भचतुष्टयजलेन यजमानं स्नापयेयुः । ततो यजमानः शुक्लमाल्याम्बरधरो धृतसर्व्वालङ्कारः पुष्पाञ्जलिमादाय कल्पपादपं त्रिः प्रदक्षिणीकृत्य नमस्ते कल्पवृक्षायेत्यादि पाहि संसारसागरादित्यन्तमन्त्रान् पठित्वा पुष्पाञ्जलिनाभ्यर्च्च्य गुर्व्वृत्विग्भ्यो यथायथं दद्यात् ॥ ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्यः अमुकामुकदेवशर्म्मभ्यो युष्मभ्यं मत्स्यपुराणोक्तकल्पपादपमहादानदानफलप्राप्तिकामोऽहं मत्स्यपुराणोक्तभागव्यवस्थया एतं गुड़प्रस्थारोपितसौवर्णब्रह्मविष्णुमहेश्वरभास्करप्रतिमासितवसनयुगान्वितगुड़प्रस्थारोपितसौवर्णसरतिकामदेवप्रतिमासितवसनयुगान्वितसौवर्णसन्तानसहितं घृतप्रस्थारोपितसौवर्णलक्ष्मीप्रतिमासितवस्त्रयुगान्वितसौवर्णमन्दारसहितं जीरकप्रस्थारोपितसौवर्णसावित्रीप्रतिमासितवसनयुगलान्वितसौवर्णपारिभद्रसहितं तिलप्रस्थारोपितसौवर्णसुरभिप्रतिमासितवसनयुगान्वितसौवर्णहरिचन्दनसहितं कौषेयवस्त्रयुगवेष्टितग्रीवेक्षुमाल्यफलान्वितकुशासनपादुकायुगकांस्यभाजनयुतपूर्णकुम्भाष्टकदीपिकोपानद्युगच्छत्रचामरासनफलमाल्ययुतपञ्चवर्णवितानकाष्टादशधान्ययुतं कल्पपादपमहादानमहं ददे ॥ प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा यथायथं अमुकपादपोऽयं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः । ततो दक्षिणादानम् ।

ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहन्दक्षिणामिमां यदुत्पत्तियोग्यां भूमिमेतानि च रत्नानि ददे ॥ प्रतिग्रहीतारः स्वस्तीत्युक्त्वा प्रत्येकं तरून् मूलेषु स्पृशेयुः । ततो यजमानस्तुलापुरुषवत् जापकेभ्यो दक्षिणादानं दीनानाथादितर्पणं ब्राह्मणवाचनञ्च कुर्य्यात् । ततः कल्पपादपं गुरवे सन्तानकादींश्चतुरो वृक्षान् ऋग्वेदादिक्रमेण चतुर्भ्य ऋत्विग्भ्यो निवेदयेत् । स्वल्पकल्पपादपदाने तु गुरुरेवैकाग्निवत् स्वगृह्योक्तविधिना सर्व्वं ब्रह्माण्डदानवत् कुर्य्यात् । इति कल्पपादपमहादानं समाप्तम् ॥*॥ इति महाराजाधिराजनिःशङ्कसङ्करश्रीमद्बल्लालसेनदेवविरचिते श्रीदानसागरे महादानदानावर्त्तः ॥

कल्पलतादानं, क्ली, (महादानान्तर्गता सुवर्णकल्पिता लता तस्या दानम् ।) महादानविशेषः ॥

तस्य विधिर्यथा ।

"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
महाकल्पलतं नाम पातकावलिनाशनम् ॥
पुण्यान्तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम् ।
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ॥
तुलापुरुषवत् कुर्य्यात् लोकेशावाहनादिकम् ।
चामीकरमयीः कुर्य्याद्दशकल्पलताः शुभाः ॥
नानापुष्पफलोपेता नानांशुकविभूषिताः ।
विद्याधरसुपर्णानां मिथुनैरुपशोभिताः" ॥

सुपर्णानां किन्नराणाम् ॥

"हारानादित्सुभिः सिद्धैः फलानि च विहङ्गमैः ।
लोकपालानुसारिण्यः कर्त्तव्यास्तासु देवताः" ॥

लोकपालानुसारिण्य इति लोकपालसमानाकृतयः ॥

"ब्राह्मीमनन्तशक्तिञ्च लवणस्योपरि न्यसेत् ।
अधस्तात् तयोर्मध्ये महाखड्गधरे शुभे" ॥

पद्मशङ्खकरे इति क्वचित् पाठः ॥

"स्वर्णासनस्था माहेन्द्री पूर्व्वतः कुलिशायुधा ।
रजनीसंस्थिताग्नेयी स्रुवपाणिरथाचला" ॥

रजनी हरिद्रा ॥

"याम्या तु महिषारूढ़ा गदिनी तण्डुलोपरि ।
नैरृत्यां नैरृती स्थाप्या सखड्गा च घृतोपरि ॥
वारुणे वारुणी क्षीरे सर्पस्था नागपाशिनी ।
पताकिनी च वायव्ये मृगस्था शर्करोपरि ॥
सौम्या तिलेषु संस्थाप्या कौवेरदिशि संस्थिता ।
माहेश्वरी वृषगता नवनीते तु शूलिनी ॥